# Dakshakritam Gauri Stotram

# દક્ષકૃતં ગૌરીસ્તોત્રમ્

## Document Information

Text title : Dakshakritam Gauri Stotram

File name : dakShakRRitaMgaurIstotram.itx

Category : devii, devI, lakShmInArAyaNIyasaMhitA, stotra

Location : doc_devii

Proofread by : PSA Easwaran

Description/comments : lakShmInArAyaNIyasaMhitA | khaNDa 1 | adhyAya 169/98-111||

Latest update : December 25, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

December 25, 2025

*sanskritdocuments.org*

# દક્ષકૃતં ગૌરીસ્તોત્રમ્

દૃષ્ટ્વા દક્ષઃ સુહૃષ્ટાત્મા બભાષે પરમેશ્વરીમ્ ।
અદ્ય મે સફલં જન્મ ચાદ્ય મે સફલં તપઃ ॥ ૯૮॥

અદ્ય મે પુણ્યકલ્લોલાઃ પુત્રીરૂપા ઉપસ્થિતાઃ ।
નારાયણ્યા જગદ્ધાત્ર્યા દર્શનં મેઽદ્ય જાયતે ॥ ૯૯॥

શિવાયાઃ પ્રકૃતેર્દેવ્યા દર્શનં મેઽદ્ય જાયતે ।
ધન્યોઽસ્મિ કૃતકૃત્યોઽસ્મિ પ્રસમ્પૂર્ણતમોઽસ્મિ ચ ॥ ૧૦૦॥

અદ્ય મે નુ જગન્માતુર્દર્શનં તવ જાયતે ।
મમ પુત્રીસ્વરૂપા ત્વં જગન્માતા સમાગતા ॥ ૧૦૧॥

અતો મે કઃ પરો લાભો યત્ર દેવાઃ પ્રતિષ્ઠિતાઃ ।
ત્વં હિ સા પરમા શક્તિરનન્તા પરમેષ્ઠિની ॥ ૧૦૨॥

ત્વમેવ પરમાનન્દા ત્વમેવાનન્દદાયિની ।
ત્વયૈવ સઙ્ગતો દેવઃ સ્વાત્માનન્દં સમશ્નુતે ॥ ૧૦૩॥

શિવં સર્વગતં સૂક્ષ્મં પરં બ્રહ્મ સનાતનમ્ ।
ત્વયિ તિષ્ઠત્યભેદેન પરબ્રહ્મમયી સ્થિતા ॥ ૧૦૪॥

નમસ્તેઽસ્તુ મહાદેવિ! નમસ્તે પરમેશ્વરિ! ।
નમો ભગવતીશાનિ શિવાયૈ તે નમો નમઃ ॥ ૧૦૫॥

ત્વન્મયોઽહં ત્વદાધારસ્ત્વમેવ ચ ગતિર્મમ ।
ત્વામેવ શરણં યામિ પ્રસીદ પરમેશ્વરિ ॥ ૧૦૬॥

મયા નાસ્તિ સમો લોકે દેવો વા દાનવોઽપિ વા ।
જગન્માતેવ મત્પુત્રી સમ્ભૂતા સા સ્વયં યતઃ ॥ ૧૦૭॥

એષા તવાઽમ્બાઽસિક્ની વીરકન્યકાઽપ્યહો ।
જગન્માતુશ્ચ માતાઽદ્ય ચાહોઽસ્યાઃ પુણ્યગૌરવમ્ ॥ ૧૦૮॥

પાહિ મામમરેશાનિ ચાસિક્ન્યા સહ સર્વદા ।
નમામિ તવ પાદાબ્બ્જં વ્રજામિ શરણં શિવમ્ ॥ ૧૦૯॥

અહો મે સુમહદ્ભાગ્યં મહાદેવીસમાગમાત્ ।
આજ્ઞાપય મહાદેવિ કિં કરિષ્યામિ શાઙ્કરિ ॥ ૧૧૦॥

એતાવદુક્ત્વા વચનં તદા દક્ષઃ પ્રજાપતિઃ ।
સમ્પ્રેક્ષમાણો ગૌરીં તાં પ્રાઞ્જલિઃ પાર્શ્વતઃ સ્થિતઃ ॥ ૧૧૧॥

ધ્યાતવાન્ સ્વસુતાં દેવીં પરબ્રહ્માત્મિકાં સતીમ્ ।
અશેષકલ્યાણમયીં સર્વવિકૃતિપારગામ્ ॥ ૧૧૨॥

ઇતિ શ્રીલક્ષ્મીનારાયણીયસંહિતાયાં પ્રથમે કૃતયુગસન્તાને ૧૬૯-અધ્યાયાન્તર્ગતં
દક્ષકૃતં ગૌરીસ્તોત્રં સમ્પૂર્ણમ્ ।

લક્ષ્મીનારાયણીયસંહિતા । ખણ્ડ ૧। અધ્યાય ૧૬૯/૯૮-૧૧૧॥

lakShmInArAyaNIyasaMhitA . khaNDa 1. adhyAya 169/98-111..

Proofread by PSA Easwaran

*Dakshakritam Gauri Stotram*
pdf was typeset on December 25, 2025

Please send corrections to *sanskrit@cheerful.com*